# Vaishnavadarshanam A Brief Study of Vaishnava Doctrine

# વૈષ્ણવદર્શનાનાં દિઙ્માત્રપરિશીલનમ્ ૨

## Document Information

Text title : Vaishnava Darshanam, a brief study 2

File name : vaiShNavadarshanam.itx

Category : misc, article, pradIptakumArananda

Location : doc_z_misc_general

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orissa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda pknanda65 at gmail.com

Proofread by : Pradipta Kumar Nanda

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : June 27, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 5, 2022

*sanskritdocuments.org*

# વૈષ્ણવદર્શનાનાં દિઙ્માત્રપરિશીલનમ્ ૨

લેખકઃ - નન્દપ્રદીપ્તકુમારઃ
વિભાગમુખ્ય ઉપાચાર્યઃ સર્વદર્શનવિભાગઃ
શ્રીજગન્નાથસંસ્કૃતવિશ્વવિદ્યાલયઃ, શ્રીવિહારઃ, પુરી

શોધસારઃ-

અસ્માકં સુરભારતી સંસ્કૃતભાષા અતીવ મધુરા, ભાવગમ્ભીરા, સરલા, સર્વાંગપૂર્ણા સર્વાસાં ભાષાણાં જનનીતિ નિર્વિવાદમેવ । અસ્યાં ભાષાયામુપનિવદ્ધાઃ સર્વા આર્યસંસ્કૃતયઃ સર્વજ્ઞાનપરંપરા ઇતિ સર્વે વિદ્વત્તલ્લજા સ્વીકુર્વન્તિ । સંસ્કૃતભાષાયાં વૈદિકજ્ઞાનપરંપરા, વેદાંગજ્ઞાનપરંપરા, શ્રૌતજ્ઞાનપરંપરા, સ્માર્તજ્ઞાનપરંપરા, ધર્મશાસ્ત્રજ્ઞાનપરંપરા, પૌરાણિકજ્ઞાનપરંપરા, દાર્શનિકજ્ઞાનપરંપરા, સાહિત્યજ્ઞાનપરંપરા, સામાજિકજ્ઞાનપરંપરા, ભૌતિકજ્ઞાનપરંપરા, વૈજ્ઞાનિકજ્ઞાનપરંપરા, ઐતિહાસિકજ્ઞાનપરંપરા, નૈતિકજ્ઞાનપરંપરા, મનોવૈજ્ઞાનિકજ્ઞાનપરંપરાદયઃ અન્યે બહુપરંપરા દરીદૃશ્યન્તે । તેષુ તેષુ પરાંપરાતઃ સારભૂતા કાચિદ્દાર્શનિકપરંપરા વરીવર્તિ । તાસુ દાર્શનિકપરંપરાસુ ભક્તિવાદીયા-વૈષ્ણવીય-ધારાવિષયે કિમપિ સંક્ષિપ્તતથ્યં પ્રકાશયામીતિ મે મતિઃ । સર્વાદૌ દર્શનશબ્દાર્થો વિવક્ષ્યતે ।

દર્શનમ્

“દૃશિર્ પ્રેક્ષણે” ઇત્યસ્માદ્ધાતોરનુબન્ધલોપે “લ્યુટ્ ચ” (૧) “કરણાધિકરણયોશ્ચ” (૨) ઇત્યાભ્યાં સૂત્રાભ્યાં કરણે ભાવે ચ લ્યુટિ “યુવોરનાકૌ” (૩) ઇત્યનાદેશે “કૃત્તદ્ધિતસમાસાશ્ચ” (૪) ઇતિ પ્રાતિપાદિકત્વાત્ સુ પ્રત્યયે “અતોઽમ્” (૫) ઇત્યનેન સોરમિ “દર્શનમ્” ઇતિ પદં નિષ્પદ્યતે । તત્ર દર્શનીયં વસ્તુ સંસારઃ આત્મતત્ત્વઞ્ચ । અપરપક્ષે દૃશ્યમાનસ્ય સંસારસ્ય કિં તાવત્તાત્ત્વિકસ્વરૂપમિતિ દર્શનશબ્દાર્થો બોધ્યઃ । યદ્વા સંસારે કોઽહં કુતઃ આયાતઃ દેહપાતે કુત્ર ગચ્છામિ કિમધુના મમ કાર્ય્યમિત્યાદીનિ સર્વાણિ આત્મસાક્ષાત્કારરૂપં દર્શનમિતિ વિવક્ષ્યન્તે મનિષિણઃ । “આત્મા વા અરે દ્રષ્ટવ્યઃ શ્રોતવ્યો મન્તવ્યોનિદિધ્યાસિતવ્યઃ” (૬) ઇત્યત્ર દૃશ્યતે જ્ઞાયતે પરમતત્ત્વમત્ર મુખ્યતયાઽભિપ્રેયતે દર્શનશબ્દેન ।

તદ્દર્શનં દ્વિવિધમ્ । આસ્તિકનાસ્તિકભેદેન । અસ્તિ પરલોકે ઈશ્વરે વેદે ચ મતિર્યસ્ય સ આસ્તિકઃ । તદ્વિપરિતો નાસ્તિકઃ । ન્યાય-વૈશેષિક-સાંખ્ય-યોગ-વેદાન્ત-મીમાંસાઃ ષડાસ્તિકાઃ સ્વીકૃતાઃ । બૌદ્ધ-જૈન-ચાર્વાકાઃ ષડ્ નાસ્તિકાશ્ચ વિખ્યાતાઃ ।

વિષયોપક્રમઃ

સર્વાન્તર્યામિનોઽખિલલોકાધિષ્ઠાતુરાનન્દકન્દસ્ય સચ્ચિદાનન્દસ્ય સર્વેશ્વરસ્ય શ્રીજગન્નાથસ્ય શ્રીહરેઃ સત્તામધિગન્તું યદ્યપિ અજસ્રપન્થા સ્થિરીક્રિયતે વિદ્વદ્ભિસ્તથાપિ અનપાયિન્યા ભક્ત્યા ભક્તઃ અચિરમેવાનન્દઘનં ભગવન્તમુપલભ્ય કૃતકૃત્યો જાયતે । તથાહ શ્રુતિઃ- "વિજ્ઞાનઘનાનન્દઘનાસચ્ચિદાનન્દૈકરસે ભક્તિયોગે સ તિષ્ઠતિ" ઇતિ । મોક્ષસાધનોપાયેષુ પ્રસિદ્ધેષુ યોગજ્ઞાનકર્મભક્તિષુ ભક્તિરેવ સર્વશ્રેષ્ઠા પ્રતિપાદિતા । સ્મૃતિરપિ- સર્વધર્માન્ પરિત્યજ્ય મામેકં શરણં વ્રજ । અહં ત્વા સર્વપાપેભ્યો મોક્ષયિષ્યામિ મા શુચ ॥ (ભગવદ્ગીતા-૧૮/૬૬) ઇત્યત્ર ત્વાં નિશ્ચિતબુદ્ધિમન્તં સર્વપાપેભ્યઃ સર્વધર્માધર્મરૂપબન્ધનેભ્યોઽહં નૂનં મોક્ષયિષ્યામીતિ અર્જુનં પ્રતિ ભગવતઃ સમુપદેશઃ સ્પષ્ટઃ । ઈશ્વરદર્શનહેતોઃ ભક્તિરત્યાવશ્યકી । મન્દમતીનામત્યલ્પશક્તીનામલ્પાયુષાં ચ મનુષ્યાણાં મનસઃ પ્રસાદાય ચિત્તપ્રશાન્તયે પરમાનન્દપ્રાપ્તયે ભક્તિરહિતઃ કશ્ચન સુગમો માર્ગો નાસ્તિ । સુતરાં સર્વસાધનસહજા સમર્પણાત્મિકા ભક્તિર્ગરીયસી વરીયસી ચ । તથા હિ ભગવતા વાસુદેવેન- માં ચ યો વ્યભિચારેણ ભક્તિયોગેન સેવતે । સ ગુણાન્ સમતીત્યૈતાન્ બ્રહ્મભૂયાય કલ્પતે ॥ અપિ ચ તત્ર- ભક્ત્યા મામભિજાનાતિ યાવાન્ યશ્ચાસ્મિ તત્ત્વતઃ । તતો માં તત્ત્વતો જ્ઞાત્વા વિશતે તદનન્તરમ્ ॥ (ભગવદ્ગીતા ૧૪/૨૬,૧૮/૫૫) ઇતિ ભગવદનુગ્રહદ્વારા એવ સકલપુરુષાર્થસિદ્ધિર્યસ્માત્ તસ્માત્ કર્મયોગો ધ્યાનયોગો જ્ઞાનયોગો વા અન્યો વા યઃ કશ્ચિત્ સ સર્વોઽપિ ભક્તિદ્વારેણૈવાર્થકરો ભવેન્નાન્યથા । ઇત્યત્ર કર્મયોગ-ધ્યાનયોગયોઃ રહસ્યં ભક્તિયોગોક્તઃ । શ્રીમદ્ભાગવતં તુ શ્રીકૃષ્ણ-પરબ્રહ્મણોરભેદો મનુતે । બ્રહ્મસૂત્રેષુ પ્રતિપાદિતં બ્રહ્મ, શ્રીમદ્ભગવદ્ગીતાયાં વર્ણિતઃ પુરુષોત્તમઃ, શ્રીમદ્ભાગવતે ચિત્રિતઃ શ્રીકૃષ્ણશ્ચેતિ ભિન્નાઃ પ્રતીયમાના સન્તોઽપિ ત્રયો વસ્તુતઃ એકમેવ તત્ત્વમાસ્તે । યચ્ચોક્તં ભાગવતે- વદન્તિ તત્તત્ત્વવિદસ્તત્ત્વં યજ્જ્ઞાનમદ્વયમ્ । બ્રહ્મેતિ પરમાત્મેતિ ભગવાનિતિ કથ્યતે ॥ (૧/૨/૧૧) ઔપનિષદા અદ્વૈતવાદિનો મુખ્યતત્ત્વં બહ્મરૂપેણ કથયન્તિ । યોગવિશારદાસ્તુ પરમાત્મશબ્દેન પરિચિન્વન્તિ । ભક્તાસ્તુ સચ્ચિદાનન્દસ્વરૂપં તત્ત્વં ભગવાનિતિ ગાયન્તિ । ભક્તાનાં મતાનુસારં વાસુદેવ-જગન્નાથ-નાયાયણ-શ્રીકૃષ્ણ-ગોવિન્દપ્રભૃતીનિ નામાનિ પર્યાયવાચકાનિ ભવન્તિ, નાન્યથા । યદ્યપિ પરમાર્થજ્ઞાનેન જીવ-ભગવતોરભેદસ્તથાપિ વ્યવહારદૃશા ભેદ એવેતિ નિશ્ચપ્રચમ્ । જીવઃ સેવકો માયાયુક્તો ભગવાન્ સેવ્યો માયામુક્ત ઇત્યનયોઃ મહાન્ ભેદઃ । ભક્તઃ કદાપિ મુક્તિર્નેચ્છતિ । ભક્તસ્ય કૃતે મુક્તેરપેક્ષયા ભક્તેરેવ પ્રાધાન્યમિતિ વૈષ્ણવીયસિદ્ધાન્તઃ । યચ્ચોક્તં ભાગવતે- સાલોક્યસાર્ષ્ટિસામીપ્યસારૂપ્યૈકત્વમપ્યુતઃ । દીયમાનં ન ગૃહ્ણન્તિ વિના મત્સેવનં જનાઃ ॥ ( ભા૦૩/૨૯/૨૩ ) ભગવત્સેવા વ્યતિરિક્તં મુક્તિમપિ તુચ્છમિતિ મન્યમાનસ્ય ભક્તસ્ય કૃતે નૂનમેતાદૃશો ભક્તિયોગઃ પરમપુરુષાર્થો વરીવર્તિ । એતસ્માત્કારણાત્ ભક્તિમતસમર્થિનાનાં વૈષ્ણવાનાં મતાનિ સંપ્રતિ પ્રવેદયિષ્યામિ ।

વૈષ્ણવલક્ષણમ્-

તત્ર નારદપઞ્ચરાત્રાદિ આગમોક્તવિધિના વિષ્ણુમન્ત્રગ્રહિતારો વૈષ્ણવાઃ । વિષ્ણુપૂજનરતાઃ । તે ચ રામકૃષ્ણનારાયણવિષ્ણ્વાદિશબ્દબ્રહ્મસમર્ચ્ચયન્તઃ  નામરૂપચિન્તનપરાયણા ભવન્તિ । વૈષ્ણવલક્ષણં તુ -

"પરમાપદમાપન્નો હર્ષે વા સમુપસ્થિતે ।
નૈકાદશીં ત્યેજેદ્યસ્તુ યસ્ય દીક્ષાસ્તિ વૈષ્ણવી ॥

વિષ્ણ્વર્પિતાખિલાચારઃ સ હિ વૈષ્ણવ ઉચ્યતે ॥(૭) ઇતિ । ષડ્ વિધા વૈષ્ણવા વિદ્યન્તે । તેષુ દ્વૈતવાદિમધ્વાચાર્ય્ય આદ્યઃ । અનેન પૂર્ણપ્રજ્ઞ ભાષ્યં વિહિતમ્ । દ્વિતીયો વેદાન્તપારિજાતસૌરભકર્ત્તા નિમ્બાર્કાચાર્ય્યો દ્વૈતાઽદ્વૈતસમર્થકઃ । તૃતીયો વિશિષ્ટાદ્વૈતવાદી રામાનુજાચાર્ય્યઃ શ્રીભાષ્યકર્ત્તા । ચતુર્થ અણુભાષ્યકર્ત્તા વલ્લભાચાર્ય્યઃ શુદ્ધાદ્વૈતવાદી । પઞ્ચમ ઔપાધિક ભેદાભેદવાદી ભાસ્કરાચાર્ય્યઃ ભાસ્કરભાષ્યકર્ત્તા । ષષ્ઠઃ શ્રીચૈતન્યમહાપ્રભુઃ । અચિન્ત્યભેદાભેદસમર્થકઃ । અત્ર બલદેવવિદ્યાભૂષણસ્ય ગોવિન્દભાષ્યં પ્રસિદ્ધમ્ । એતેષાં મતાનિ પ્રદર્શ્યન્તે ક્રમશઃ ।

પાઞ્ચરાત્રમતમ્-

તત્રાદૌ પાઞ્ચરાત્રે બ્રહ્મણો નારાયણસ્ય સગુણ-નિર્ગુણભેદેન રૂપદ્વયં પ્રસિદ્ધમ્ । જ્ઞાન-શક્તિ-ઐશ્વર્ય્ય-બલ-બીર્ય્ય-તેજાંસિ ષડ્ગુણાઃ । તદ્ગુણવિગ્રહવાન્ વાસુદેવઃ । લક્ષ્મીઃ ભગવત આત્મભૂતા શક્તિઃ । સૃષ્ટ્યારમ્ભે ક્રિયાશક્તિ-ભૂતિશક્તિભેદાભ્યાં દ્વિધા વિભક્તા । જગદુત્પાદનાત્મકઃ સંકલ્પઃ ક્રિયાશક્તિરિતિ પરિચિતા । જગદ્રૂપેણ પરિણતિર્હિ ભૂતિશક્તિરિત્યુચ્યતે । યચ્ચોક્તમ્-

ક્રિયાખ્યો યોઽયમુન્મેષઃ સ ભૂતિપરિવર્તકઃ ।

લક્ષ્મીમયઃ પ્રાણરૂપો વિષ્ણોઃ સંકલ્પ ઉચ્યતે ॥(૮) ઇતિ । લક્ષ્મ્યા અનુગ્રહેણ વિશ્વસૃષ્ટિર્જાયતે । પાઞ્ચરાત્ર મતેન વ્યૂહ-વિભવ-અર્ચ્ચાવતાર-અન્તર્યામી ભેદેન ચત્વાર અવતારાઃ । વાસુદેવાત્સંકર્ષણઃ । સંકર્ષણાત્પ્રદ્યુમ્નઃ । પ્રદ્યુમ્નાત્ અનિરુદ્ધ ઇતિ ચત્વારો વ્યૂહાઃ । ભાગવતેઽપિ વ્યૂહા ઉક્તાઃ । યદુક્તમ્-

નમસ્તે વાસુદેવાય નમઃ સંકર્ષણાય ચ ।

પ્રદ્યુમ્નાયાનિરુદ્ધાય સાત્વતાં પતયે નમઃ ॥(૯) ઇતિ પાઞ્ચરાત્રપરંપરા ધાર્મિકવિકાશરૂપેણ પ્રસ્તુતા સતિ વૈષ્ણવપુરાણેષુ દરીદૃશ્યતે । નિષ્કામકર્મણા ભગવતિ ભક્તિર્જાયતે । ભક્ત્યા ભગવચ્છરણાગતિરૂપા બ્રહ્મભાવાપત્તિર્મોક્ષઃ । તદર્થં ભગવદારાધનં સર્વશ્રેષ્ઠમિતિ નિશ્ચપ્રચમ્(૧૦) । પ્રત્યપાદિ ભગવતા વ્યાસેન-

સમારાધ્યૈવ ગોવિન્દં ગતા મુક્તિં મહર્ષયઃ ।

તસ્માદ્ભજ હૃષીકેશં કૃષ્ણં દેવકીનન્દનમ્ ॥

તદ્બ્રહ્મ પરમં પ્રોક્તં તદ્ધામ પરમં પદમ્ ।

તદ્ ગત્વા કાલવિષયાદ્ વિમુક્તા મોક્ષમાશ્રિતાઃ ॥(૧૧) ઇતિ ।

મધ્વમતમ્-

આનન્દતીર્થનામા મધ્વાચાર્ય્યો દ્વૈતવાદસ્ય પ્રધાનઃ । તેન ઉપનિષદાં બ્રહ્મસૂત્રસ્ય ચ આખ્યાયેન યન્મતં પ્રતિષ્ઠાપિતં તદેવ માધ્વમતં માધ્વદર્શનં માધ્વવેદાન્તો વા વ્યવહ્રિયતે । વિષ્ણુ ઈશ્વરઃ, લક્ષ્મીઃ ઈશ્વરસ્ય શક્તિઃ, વિષ્ણુઃ અપ્રાકૃતેન નિત્યદેહેન નિરન્તરં યુક્તઃ અનન્તકલ્યાણાદિગુણૈઃ સુસંપન્નઃ સર્વજ્ઞઃ સર્વકર્ત્તા સર્વવ્યાપકઃ પરમકૃપાલુશ્ચ ભવતિ । ભક્તાનામનુગ્રહાય સંસારત્રાણાય ચ સ મત્સ્યાદ્યવતારાન્ ગૃહ્ણાતિ । જીવઃ પ્રકૃતિશ્ચ ચત્વારો મુખ્યાઃ પરસ્પરભિન્નાઃ પદાર્થાઃ સ્વીકૃતાઃ । તન્નયે જીવેશ્વરયોરશેષપાર્થક્યં સ્વીકૃતમ્ । જીવ અજ્ઞઃ સ્વકર્માનુરૂપં સંસરણશીલઃ સર્વદા પરમેશ્વરાધીન ઉપાસકઃ સેવકો ભક્તશ્ચ । બ્રહ્મ ઉપાસ્યં સેવ્યં પૂજનીયં ચ । અનયોર્મધ્યે ઐક્યં નાસ્તિ । તત્ર

દ્રવ્યગુણકર્મસામાન્યવિશેષવિશિષ્ટાંશિશક્તિસાહચર્યાભાવાઃ દશપદાર્થાઃ સ્વીકૃતાઃ । દ્રવ્યાણિ વિંશતિસંખ્યકાનિ । પરમાત્મા ભગવાન્ વિષ્ણુરેવ । લક્ષ્મીઃ ભગવતઃ શક્તિઃ । જીવા અનુચરા અજ્ઞાનદુઃખદૂષિતાઃ । એતત્સર્વં-
શ્રીમન્મધ્વમતે હરિઃ પરતરઃ સત્યં જગત્તત્ત્વતો
ભેદાઃ જીવગણાઃ હરેરનુચરા નીચોચ્ચભાવં ગતાઃ ।
મુક્તિર્નૈજસુખાનુભૂતિરમલા ભક્તિશ્ચ તત્સાધનં

અક્ષાદિત્રિતયં પ્રમાણમખિલામ્નાયૈકવેદ્યો હરિઃ ॥ (૧૨) ઇતિ વ્યાસતીર્થેન મધ્વમતં સંકીર્ત્તિતમ્ । ભગવતો વિષ્ણોઃ વિગ્રહે અન્તઃ પ્રવિશ્ય તદીયેન અપ્રાકૃતેન દેહેન આનન્દસ્યાનુભવો મુક્તિઃ । એષા ભગવત્સાયુજ્યરૂપા સાલોક્ય-સામીપ્ય- સારૂપ્યરૂપેણ ક્રમેણ લભ્યા । સાલોક્યાદિકં ચ અર્ચિરાદિમાર્ગેણ પ્રાપ્તમ્, સ ચ પ્રાકૃતદેહતો જીવસ્ય ઉત્ક્રાન્ત્યા લભ્યઃ । ઉત્ક્રાન્તિશ્ચ કર્મક્ષયસાધ્યા । કર્મક્ષયશ્ચ ભગવદનુગ્રહેણ પ્રાપ્યઃ । સ ચ વેદવિહિતકર્મણામનુષ્ઠાનેન ભગવત્સ્વરૂપજ્ઞાનેન ચ ભગવદ્ભક્ત્યા સાધ્યઃ ।(૧૩) ઇતિ ।
નિમ્બાર્કમતમ્-

કદાચિદ્ દ્વેતાદ્વૈતવાદી નિમ્બાર્કાચાર્યઃ । તન્નયે બ્રહ્મ સગુણં નિર્ગુણં ચેત્યસ્મિન્નર્થે દ્વૈતાદ્વૈતવાદઃ । જીવબ્રહ્મણો ભેદૌ અભેદૌ વેત્યસ્મિન્પક્ષે તુ દ્વૈતાદ્વૈતૌ ભેદાભેદવાદૌ વા સ્વીકૃતૌ ।(૧૪) આત્માનાત્મકભેદેન તત્ત્વં દ્વિવિધમ્ । આત્મા જીવાત્મપરમાત્મભેદેન દ્વિવિધૌ । જીવો જ્ઞાનવાન્ જ્ઞાતૃત્વાદિધર્માધારરૂપઃ । અણુઃ પરતન્ત્રઃ પ્રતિશરીરં ભિન્નો બન્ધમોક્ષયુક્ત ઇતિ વદન્તિ । પ્રકૃતિપુરુષકાલકર્મણાં નિયન્તા પરંબ્રહ્મ વાસુદેવઃ શ્રીકૃષ્ણઃ । તસ્ય હરિરિતિ નામાન્તરં વિદ્યતે । જીવેશ્વરયોરંશાશિભાવસમ્બધઃ સ્થિરીકૃતઃ । પ્રકૃતિસ્તત્કાર્યદેહાદિકમનાત્મતત્ત્વમ્ । તદુક્તમ્-
જ્ઞાનસ્વરૂપં ચ હરેરધીનં શરીરસંયોગવિયોગયોગ્યમ્ ।

અણું હિ જીવં પ્રતિદેહભિન્નં જ્ઞાતૃત્વવન્તં યદનન્તમાહુઃ ॥ (૧૫) ઇતિ । મુક્તૌ શ્રીકૃષ્ણપદસેવનં વિના અન્યત્ સાધનં નાસ્તિ । “તસ્માત્ કૃષ્ણ પરો દેવઃ તં ધ્યાયેત્ । તં રસેત્ તં ભજેત્ તં યજેત્ ૐ તત્સદિતિ । ” (૧૬) રાધા શ્રીકૃષ્ણસ્યાહ્લાદિની શક્તિઃ સર્વેશ્વરી । રાધાકૃષ્ણયોર્મધ્યે વિમ્બપ્રતિવિમ્બભાવઃ સ્વીકૃતઃ । તથા હિ ભાગવતે-

રેમે રમેશૌ વ્રજસુન્દરિભિર્યથાર્ભકઃ સ્વપ્રતિવિમ્બવિભ્રમઃ ।(૧૭) ઇતિ । અપિ ચાત્ર-
કૃત્વા તાવન્તમાત્માનં યાવતી ગોપયોષિતઃ ।

રેમે ચ ભગવાંસ્તાભિરાત્મારામોઽપિ લીલયા ॥(૧૮)ઇતિ જીવસ્ય ભગવદ્ભાવાપત્તિઃ મુક્તિઃ । ભગવદ્ભાવાપત્તિર્નામ જગત્કર્તૃત્વવ્યતિરિક્તાનાં ભગવતો ધર્માણામવાપ્તિઃ । એતત્સિદ્ધિઃ પ્રેમાપરપર્યાયયા રાગાત્મિક્યા ભગવતો ભક્ત્યા સંજાયતે । સા ચ ભગવતઃ કૃપયા નિષ્કામકર્મપૂર્વિકાય શરણાગત્યા હિ સ્વયંસંપૂર્ણા જાયતે ।
રામાનુજમતમ્-

વિશિષ્ટાદ્વૈતવાદી રામાનુજાચાર્યઃ શ્રીવૈષ્ણવસંપ્રદાયસ્ય પ્રાથમ્યેન પ્રથિતો મહાન્ દાર્શનિકો મનીષી । તેન બ્રહ્મસૂત્રસ્ય ઉપનિષદાં ચ વિશિષ્ટાદ્વૈતપરં વ્યાખ્યાનમુપસ્થાપ્ય વિશિષ્ટાદ્વૈતદર્શનસ્ય મહતી પ્રચેષ્ટા પ્રતિષ્ઠાપિતા । વિશિષ્ટં ચ વિશિષ્ટં ચ વિશિષ્ટે વિશિષ્ટયોઃ સ્થૂલચિદચિદ્વિશિષ્ટબ્રહ્મણઃ સૂક્ષ્મચિદ્વિશિષ્ટબ્રહ્મણશ્ચાદ્વૈતં ભેદભાવ

ઐક્યમિતિ વિશિષ્ટાદ્વૈતમ્ । અત્ર ત્રયઃ પદાર્થા વિવેચિતાઃ ચિદચિદીશ્વરભેદાત્ । ચિદત્ર જીવાત્માનો બહવઃ । અચિત્તુજડરૂપં જગત્ । સકલકલ્યાણકરઃ કરુણાવરુણાલયઃ સર્વજ્ઞઃ સર્વશક્તિમાન્ સ્વયંપ્રકાશઃ જગત્પ્રભુઃ શ્રીમન્નારાયણોઽદ્વિતીયશ્ચેતનઃ સાધ્યઃ ઈશ્વરો જીવં જડં જગચ્ચ વ્યાપ્નોતિ । સ ચ તયોઃ જીવજડયોરન્તઃ સ્થિત્વા તયોર્નિયામકત્વાત્ અન્તર્યામીતિ વ્યપદિશ્યતે । જીવો જગચ્ચ ઈશ્વરસ્ય દેહૌ । ઈશ્વરઃ કદાપિ તાભ્યાં શૂન્યો ન ભવતિ । ચતુર્દશબ્રહ્માણ્ડા અનન્તજીવાશ્ચ તચ્છરીરમ્ । સાધ્યસિદ્ધ્યર્થં ન જ્ઞાનં નાપિ જ્ઞાનકર્મસમુચ્ચયઃ કિન્તુ ભક્તિરેવ માન્યા । રામાનુજમતે વૈકુણ્ઠલોકે ભગવતઃ કિંકરરૂપેણ અવસ્થાનં કૈવલ્યમ્ । તત્પ્રાપ્તિશ્ચ જ્ઞાનકર્મભ્યાં સાધ્યયા ભગવત્પ્રપત્તિલક્ષણયા ભક્ત્યા । ભગવત્પ્રપત્તિશ્ચ ભગવતઃ શરણાગતિઃ । વેદવિહિતકર્મણામનુષ્ઠાનેન ચિત્તે નિષ્કલુષે સતિ બ્રહ્મણો જિજ્ઞાસા સમુદેતિ । તતઃ ગુરુપ્રપ્રત્તિઃ । ગુરુપદેશેન ચ જ્ઞાનં પ્રકાશતે । તતઃ જ્ઞાનકર્મણોરુભયોઃ સંપન્નત્વે ભગવત્પ્રપત્તિલક્ષણા ભક્તિર્જાયતે । ભક્તિપૂર્ણચેતસ્કં જીવં ભગવાન્ અનુગૃહ્ણાતિ તદ્વશાશ્ચ જીવસ્ય ભગવતોઽપરોક્ષાનુભવો જાયતે । તતઃ મુક્તિરિતિ ।

વલ્લભમતમ્-

પુષ્ટિમાર્ગપ્રવર્ત્તકો વલ્લભ અણુભાષ્યકર્ત્તા શુદ્ધાદ્વૈતવાદી । તન્મતાનુસારં-" વેદાઃ શ્રીકૃષ્ણવાક્યાનિ વ્યાસસૂત્રાણિ ચૈવ હિ । સમાધિભાષા વ્યાસસ્ય પ્રમાણં તત્ ચતુષ્ટયમ્ ॥ " (૧૯) ઇતિ કર્તૃત્વ ભોક્તૃત્વત્વાત્ ભગવાન્ શ્રીકૃષ્ણઃ એવ પરમાત્મા બ્રહ્મ । શ◌ૃંગારરસપ્રધાનસ્વરૂપઃ । જીવ અણુઃ । બ્રહ્મણોંઽશઃ । જીવસ્ય ભગવદ્ધર્માણાં તિરોભાવ એવ જીવભાવઃ । જગદિદં તતો ભેદમાપન્નં તસ્યૈવ લીલામાત્રં શાશ્વતમ્ । સાધનં જ્ઞાનભક્તિરૂપમુક્તમ્ । શ્રવણમનનોપાસનાદિભિઃ પાપક્ષયે સતિ ભગવત્પ્રેમોત્પત્તિસ્તતો મુક્તિરિત્યુચ્યતે । ભક્તિશ્ચ દ્વિધા મર્યાદાભક્તિઃ પુષ્ટિભક્તિશ્ચ । મર્યાદાનામ શાસ્ત્રવર્ણિતા પદ્ધતિઃ પરમાત્મનઃ ચરણારવિન્દમકરન્દમિલિન્દાયમાનત્વપ્રધાના । પુષ્ટિભક્તિશ્ચ સતતં શ્રીકૃષ્ણમુખચન્દ્રચકોરાયમાણતા ભગવત્પ્રીતિરૂપા ભગવદનુગ્રહસાધ્યા, પ્રથમા ભગવત્સાયુજ્યજનની દ્વિતીયા ચ જીવે ભગવદભેદાનુભવાભિવ્યઞ્જની ઉક્તા ।

ચૈતન્યમતમ્-

અસૌ ચૈતન્યમહાપ્રભુઃ ભગવત અવતારભૂત ઇતિ જીવગોસ્વામિના ભાગવતસન્દર્ભે ઉક્તમ્ । તદ્યથા-
અન્તઃ કૃષ્ણં બહિર્ગૌરં દર્શિતાંગાદિવૈભવમ્ ।

કલૌ સંકીર્તનાદ્યૈઃ સ્મઃ કૃષ્ણચૈતન્યમાશ્રિતાઃ ॥(૨૦) ઇતિ । સ્વરૂપાદ્યભિન્નત્વેન ચિન્તયિતુમશક્યત્વાદ્ ભેદઃ,ભિન્નત્વેન ચિન્તયિતુમશક્યત્વાદ્ અભેદશ્ચ પ્રતીયતે । અનેન શક્તિશક્તિમતો ભેદાભેદૌ અંગીકૃતૌ । તૌ ચ અચિન્ત્યૌ ।(૨૧) ચૈતન્યમહાપ્રભુણા ન કોઽપિ ગ્રન્થઃ લિખિતઃ । કેવલં "શિક્ષાષ્ટકં" રચિતવાનીતિ કેચિદ્વદન્તિ । યદ્યપિ ચૈતન્યસંપ્રદાયઃ માધ્વમતસ્ય શાખાવિશેષસ્તથાપિ માધ્વમત-ચૈતન્યમતયોઃ મહાન્ ભેદઃ સ્વીક્રિયતે । ચૈતન્યમતસ્ય પ્રધાનાચાર્યઃ બલદેવવિદ્યાભૂષણઃ । તેન બ્રહ્મસૂત્રોપરિ અચિન્ત્યભેદાભેદમતીયં ગોવિન્દભાષ્યં વિલિખિતમ્ । તન્નયે ઈશ્વર-જીવ-પ્રકૃતિ-કાલ-કર્માણિ પઞ્ચતત્ત્વાનિ શ્રૂયન્તે । ઈસ્વરો વિભુચૈતન્યમ્ નિત્યજ્ઞાનાદિગુણકં શ્રીકૃષ્ણ એવ પરમોત્તમં વસ્તુ । જીવાત્મા અણુચૈતન્યમ્ । ઈશ્વરવન્નિત્યજ્ઞાનાદિગુણવિશિષ્ટોઽસ્મચ્છબ્દવાચ્યઃ । વિશ્વં સત્યમ્ । જીવમાત્રો હરેર્દાસઃ । શ્રીકૃષ્ણસ્ય ચરણલાભ એવ મુક્તિઃ । ભક્તિરેવ મુક્તિપ્રાપ્તયે ચરમસાધનમ્ । યચ્ચોક્તમ્-

આરાધ્યો ભગવાન્ વ્રજેશતનયસ્તદ્ધામવૃન્દાવનં
રમ્યા કાચિદુપાસના વ્રજવધૂવર્ગેણ યા કલ્પિતા ।
શાત્રં ભાગવતં પ્રમાણમમલં પ્રેમા પુમર્થો મહાન્

શ્રીચૈતન્યમહાપ્રભોર્મતમિદં તત્રાદરો નઃ પરઃ ॥(૨૨) ઇત્યત્ર શ્રીકૃષ્ણસેવા એવ મુક્તિરુક્તા । યદ્યપિ કૃષ્ણસેવા સમયવિશેષે સંસારેઽપિ કદાચિત્ કેષાંચિત્ સમ્ભવતિ પરં સા ન મુક્તિઃ । કિન્તુ બ્રહ્માત્મભાવપ્રાપ્તિપૂર્વિકા કૃષ્ણસેવૈવ મુક્તિઃ ।
જગન્નાથદર્શનમ્-

વૈષ્ણવદર્શનેષુ જગન્નાથદર્શનં સ્વતન્ત્રમ્ । તન્નયે શ્રીજગન્નાથ એવ સર્વવૈષ્ણવાનામાધારપુરુષઃ । સ એવ ભુક્તિમુક્તિપ્રદાતા । પરંબ્રહ્મસ્વરૂપઃ । સર્વદર્શનાદર્શઃ ભગવાન્ શ્રીજગન્નાથ એવ પરમેશ્વરઃ । યચ્ચોક્તમભિયુક્તૈઃ-
"યદ્બ્રહ્મેતિ નિનાદિતં હિ પરમાઽદ્વૈતપ્રિયૈઃ શાંકરૈઃ
વિષ્ણુર્વૈષ્ણવશેખરૈશ્ચ ભણિતો માધ્વૈસ્તથા ભાસ્કરૈઃ ।
નિમ્બાર્કૈઃ ખલુ વલ્લભૈર્વ્રજસુતો રામશ્ચ રામાનુજૈઃ

સોઽયં દારુમયઃ સુગોપલલિતશ્ચૈતન્યકાન્તોઽવતુ ॥ " (૨૩) ઇતિ દ્વૈતાદ્વૈતીનાં સારભૂતઃ સિદ્ધાન્તઃ દારુબ્રહ્મ નિશ્ચિતઃ સ ચ જગન્નાથ-બલભદ્ર-સુભદ્રા-સુદર્શનભેદેન ચતુર્ધાવિભક્તઃ । દારુવિગ્રહાણાં નિર્માણં ભગવતા વિષ્ણુના સંપાદિતમ્ । ઉક્તં ચ-

નિર્વવાહ સ્વયં દેવઃ ક્રમાત્પઞ્ચદશે દિને । ચતુર્મૂર્ત્તિઃ સ ભગવાન્ યથાપૂર્વં મયોદિતઃ ॥(૨૪) ઇતિ લક્ષશાલગ્રામશિલાભિઃ પૂર્ણે નાનામણિમયે કોટિસૂર્યસમપ્રભે દિવ્યસિંહાસને(૨૫) પ્રણવાત્મિકે(૨૬) મુખ્યરૂપેણ ચતુર્ધામૂર્ત્તયઃ શોભન્તે । વસ્તુતઃ શ્રીજગન્નાથ બલભદ્રઃ સુભદ્રા સુદર્શનઃ ભુદેવી શ્રીદેવી માધવશ્ચ એવં સર્વે મિલિત્વા સપ્તધા મૂર્ત્તય ભવન્તિ । એતેષાં ધ્યાનાનિ નીલાદ્રિમહોદયે ઉક્તાનિ(૨૭) । તથાહિ-
નીલજીમૂતસંકાશઃ પદ્મપત્રાયતેક્ષણઃ ।
શોણાધરધરઃ શ્રીમાન્ ભક્તાનામભયંકરઃ ॥

બલભદ્રસ્તથા સપ્તફણાવિકટમસ્તકઃ ।
કુન્દેન્દુશંખધવલઃ પ્રકાશોમ્બુજલોચનઃ ॥

ગુપ્તપાદકરામ્ભોજઃ સમુત્તલિતસદ્ભુજઃ ।
ભક્તાનામવનાયૈવ તથા ભદ્રાપિ ભદ્રદા ॥

અધિલમ્બિતહસ્તાબ્જા કુંકુમાભા શુભાનના ।
સુદર્શનઃ સ્તમ્ભરૂપી બભૂવ વિજિતેન્દ્રિયઃ ॥

પ્રભોઃ સ્વરૂપમભજન્માધવો હ્રસ્વરૂપકઃ ।

લક્ષ્મીશ્ચતુર્ભુજા વિપ્રા વરાભયધરા તદા ॥

તથૈવ સાબ્જયુગલં ધારયન્તી સ્મિતાનના ।
ચતુર્ગજકરોત્ક્ષિપ્તસુવર્ણકલસાકૃતૈઃ ॥

કૃતાભિષેકા કમલા કમલાસનસંસ્થિતા ।
પદ્માસનાગતા દેવી વિશ્વધાત્રી તથા દ્વિજાઃ ॥

જ્ઞાનમુદ્રાં કરે દક્ષે વામે ચ ચારુપંકજમ્ ।
ધારયન્તી ધરાદેવી પ્રકાશા ધવલાકૃતિઃ ॥ ઇતિ ।
કેવલં જગન્નાથમૂર્ત્તિસ્વરૂપં તુ શ્રીજગન્નાથદર્શને-
ગોલાકારાક્ષયુક્તા નિખિલમણિમયી હેમભૂષાંગશોભા
શ્યામા કામાભિરામા સ્વજનસહરતા પ્રેમધારાવહન્તી ।
યા સા સંસારસારા શ્રિતજનવિષયા બ્રહ્મરૂપા પ્રસન્ના
પાયાત્સંભ્રાન્તનીલાચલભુવનસુખા સ્રગ્ધરા દારુમૂર્ત્તિઃ ॥(૨૮) ઇતિ । ત્રિમૂર્ત્તિસ્વરૂપં તત્ર-
સ્વસ્રા રામગદાગ્રજેન સમલંકારાય દાર્વાત્મને
ભેદાભેદવિધૂતભોગપતયે શ◌ૃંગારરાગાત્મને ।
નીલાદ્રૌ મણિમણ્ડપે પ્રિયપુરી-શ્રીમન્દિરસ્વામિને
તસ્મૈ પ્રાઞ્જલિરસ્મિ કૃષ્ણનિધયે રાધાપ્રિયજાનયે ॥(૨૯) ઇતિ

અસૌ મૂલનારાયણઃ । સ એવ શૈવાનાં પ્રિયઃ શિવઃ । ગાણપત્યાનાં ગણપતિઃ । સૌરાણાં સૂર્ય ઇતિ નિશ્ચિતઃ । પઞ્ચવિંશતિતત્ત્વાનિ જગન્નાથવિગ્રહે સમ્મિલિતાનિ ભવન્તિ । અષ્ટાંગયોગસારો જગન્નાથઃ । ન દ્રવ્યાદયઃ સપ્તપદાર્થા મોક્ષપ્રદાયિકાઃ । નાપિ મોક્ષે ષોડશપદાર્થજ્ઞાનસ્ય કાચિદાવશ્યકતા વિદ્યતે । માયાવાદિમતં કુહકવદ્ હેયમ્ । પાઞ્ચરાત્રવ્યુહાતીતઃ પરમેશ્વરો મહાકારુણિકો દારુદેવઃ સર્વતન્ત્રલક્ષ્યઃ । ઉક્તં ચાત્ર શ્રીજગન્નાથદર્શને -
વ્યૂહાતીતસમસ્તદૃશ્યપટલં તદ્દારુદેહાશ્રિતઃ
સૂક્ષ્મસ્થૂલચતુષ્ટયૈર્વિલસિતો વેદાન્તસારોપમઃ ।
નિત્યં તત્ત્વમસિ પ્રધાનપુરુષો માયામયો નિર્જર

આસ્તે મિષ્ટમહાપ્રસાદજનકઃ કૈવલ્યદાતા હરિઃ ॥(૩૦) નિઃશ્રેયશબ્દસાર્થકત્વં પરમાર્થતત્ત્વં ચ વાસુદેવાખ્યં જગન્નાથશબ્દગોચરીભૂતમ્ । તત્તુ સાધ્યતત્ત્વમિતિ પ્રવાચ્ય ભક્તિસાધનેન તસ્ય સાક્ષાત્કારઃ સમ્ભવ ઇતિ પરમપુરુષાર્થો નિગદિતઃ ।
ઉપસંહારઃ

મુક્તિર્ભગવદ્વશીકારરૂપા । ભક્તદ્વારા ભગવતો વશીકરણમેવ મુક્તિરિતિ ભક્તા મન્યન્તે । સા તુ વસ્તુતઃ મુક્તેરપિ બલીયસી । પઞ્ચસખ- બન્ધુમહાન્તિ- સાલવેગ- દાસિઆ વાઉરિ- બલરામદાસાદયઃ અત્ર કેચન ભક્તા ઉદાહરણરૂપેણ પ્રસ્તૂયન્તે । તથાહિ-

અસ્પૃશ્ય પ્રિયસાલવેગહૃદયે શ્રીદાસિઆમાનસે
પ્રેમ્ણા બન્ધુમહાન્તિ ભક્તિતરલે ચિરં કદા રાજતે ।
સંસારે બલરામદાસનિલયે ભક્તાશ્રયે પ્રાયશઃ

સોઽયં શ્રીપુરુષોત્તમો વિજયતે બ્રહ્માણ્ડનાથેશ્વરઃ ॥(૩૧) ઇત્યત્ર ભક્તવાઞ્છાકલ્પદ્રુમો જગન્નાથઃ સર્વેશ્વરઃ સિદ્ધાન્તિતઃ । અસ્ય દારુબ્રહ્મણો મહાપ્રસાદભોજનેન ભક્ત્યા ચ કૈવલ્યપ્રાપ્તિર્જાયતેતિ મહતી શ્રુતિઃ । અલમતિવિસ્તરેણ ।

ટિપ્પણી (footnotes)

(૧) અષ્ટાધ્યાયી સૂત્રર્પાથ -૧/૩/૧૧૫
(૨) અષ્ટાધ્યાયી સૂત્રર્પાથ -૩/૩/૧૧૭
(૩) અષ્ટાધ્યાયી સૂત્રર્પાથ -૭/૧/૧
(૪) અષ્ટાધ્યાયી સૂત્રર્પાથ -૧/૨/૪૬
(૫) અષ્ટાધ્યાયી સૂત્રર્પાથ -૭/૧/૨૪
(૬) બૃહદારણ્યક ઉપનિષત્ -૨/૪/૫
(૭) નિર્ણયસિન્ધુ
(૮) અહિર્બુધ્ન્ય સંહિતા-૩/૨૧
(૯) ભાગવતે-૧૦/૪૦/૨૧
(૧૦) ભક્તિચન્દ્રિકા પૃ-૨૧
(૧૧) મહાભારતે શાન્તિપર્વે-૨૦૬/૧૪
(૧૨) સામાન્યદર્શનમ્ પૃ-
(૧૩) ભા૦@દ૦@કૈ૦@અ૦@ પૃ- ૧૨૪
(૧૪) સર્વદર્શનકૌમુદી પૃ-૨૦૩
(૧૫) દશશ્લોકી-૧
(૧૬) દશશ્લોકીટીકા પૃ-૩૬
(૧૭) ભા૦@ગ૦@-૧૦/૩૩/૩૭
(૧૮) તત્ર-૧૦/૩૩/૨૦
(૧૯) વૈ૦@સં૦@ સા૦@સિ૦@- પૃ-૧૧૫
(૨૦) ભાગવતસન્દર્ભે -૧૨/૩૨
(૨૧) ભાગવતસન્દર્ભે
(૨૨) વૈ૦@સં૦@ સિ૦@ પૃ-૪૪૩
(૨૩) શ્રીજગન્નાથદર્શનમ્ શ્લોક-૧
(૨૪) સ્કન્દપુરાણ- ૧૯/૭

(૨૫) મહાપુરુષવિદ્યા - ૩/૧૦૧

(૨૬) મહાપુરુષવિદ્યા - ૪/૪૪

(૨૭) નીલાદ્રિમહોદયઃ -૪/૧૦/-૧૭

(૨૮) શ્રીજગન્નાથદર્શનમ્ - ૧૨૭

(૨૯) શ્રીજગન્નાથદર્શનમ્ - ૧૨૬

(૩૦) શ્રીજગન્નાથદર્શનમ્ - ૨૪

(૩૧) શ્રીજગન્નાથદર્શનમ્ - ૧૭૫

સહાયકગ્રન્થાઃ

૧. અષ્ટાધ્યાયી સૂત્રપાંથ

૨. નિર્ણયસિન્ધુઃ

૩. અહિર્બુધ્ન્યસંહિતા

૪. શ્રીમદ્ભાગવતમ્

૫. ભક્તિચન્દ્રિકા

૬. ભક્તિરત્નાવલી

૭. મહાભારતમ્

૮. સામાન્યદર્શનમ્

૯. ભારતીયદર્શન

૧૦. સર્વદર્શનકૌમુદી

૧૧. દશશ્લોકી

૧૨. વૈષ્ણવમતાબ્જભાસ્કરઃ

૧૩. ભાગવતસન્દર્ભઃ

૧૪. ભારતીયદર્શનોંકા શાસ્ત્રાર્થપદ્ધતિ

૧૫. સાંખ્યકારિકા

૧૬. વેદાન્તસારઃ

૧૭. તર્કભાષા

૧૮. ન્યાયસિદ્ધાન્તમુક્તાવલી

૧૯. સર્વદર્શનસંગ્રહઃ

૨૦. ષડ્દર્શનસમુચ્ચયઃ

૨૧. બૃહદારણ્યક ઉપનિષત્

૨૨. શ્રીજગન્નાથદર્શનમ્

૨૩. શ્રીક્ષેત્રસુધાનિધિઃ

૨૪. નીલાદ્રિમહોદયઃ

૨૫. મહાપુરુષવિદ્યા

૨૬. શ્રીમદ્ભગવદ્ગીતા

— લેખકઃ - નન્દપ્રદીપ્તકુમારઃ

Written by Dr. Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

---

*Vaishnavadarshanam A Brief Study of Vaishnava Doctrine*

pdf was typeset on November 5, 2022

Please send corrections to *sanskrit@cheerful.com*